श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्त महा देसिकाय नमः

---

Please install **Sanskrit New font** to view this file in sanskrit script.

---

## वेगासेतु स्तोत्रम्

श्रीमान् वेङ्कट नाथार्यः कवितार्किक केसरी।
वेदान्ता चार्य वर्योमे सन्निधत्तां सदाहृदि॥

एकम् वेगवती मध्ये हस्तिशैले च दृश्यते।
उपाय फल भावेन स्वयं व्यक्तं परं महः॥१

ईष्टे गमयितुम् पारमेष सेतुरभङ्गुरः।
यत्र सारस्वतं स्रोतो विश्राम्यति विशृङ्खलम्॥२

जयति जगदेसेतुः वेगवती मध्य लक्षितो देवः।
प्रशमयति यः प्रजानाम् प्रथितान् संसार जलधि कल्लोलान्॥३

विभातु मे चेतसि विष्णु सेतुः
वेगापगा वेग विघात हेतुः।
अम्भोज योनेर्यदुपज्ञम् आसीत्
अभङ्ग रक्षा हयमेध दीक्षा॥४

चतुरानन सप्ततन्तु गोप्ता
सरितं वेगवतीम् असौ निरुन्धन्।
परिपुष्यति मङ्गलानि पुंसां
भगवद् भक्तिमतां यथोक्तकारी॥५

श्रीमान् पितामह वधू परिचर्यमाणः
शेते भुजङ्ग शयने स महा भुजङ्गः।

प्रत्यादि शन्ति भव सञ्चरणं प्रजानां
भक्तानु गन्तुरिह यस्य गतागतानि ॥६

प्रशमित हयमेध व्यापदं पद्मयोनेः
श्रित जन परतन्त्रं शेष भोगे शयानम् ।
शरणमुपगताः स्मः शान्त निः शेषे दोषम्
शतमख मणि सेतुम् शाश्वतं वेगवत्याः ॥७

शरणम् उपगतानां सोऽयमादेश कारी
शमयति परितापं संमुखः सर्व जन्तोः ।
शतगुण परिणामः सन्निधौ यस्य नित्यम्
वर वितरण भूमा वारणाद्रीश वरस्य ॥८

काञ्ची भाग्यं कमल निलया चेतसोऽभीष्ट सिद्धिः
कल्याणानां निधिर विकलः कोऽपि कारुण्य राशिः ।
पुण्यानां नः परिणतिरसौ भूषयन् भोगिशय्यां
वेगा सेतुर् जयति विपुलो विश्व रक्षैकहेतुः ॥९

वेगासेतोर् इदम् स्तोत्रम् वेङ्कटेशेन निर्मितम् ।
ये पठन्ति जनास्तेषां यथोक्तं कुरुते हरिः ॥१०

कवितार्किक सिंहाय कल्याणगुणशालिने ।
श्रीमते वेङ्कटेशाय वेदान्तगुरवे नमः

---

Please send your comments and suggestions to R.Venkat



rmvenkat@yahoo.com